न्नय इत्यादिकं विकल्पापवादत्वेनेत्युभयं चिन्तितम्। तदेवं द्वादशाध्यायगतेषु षष्टिसंख्यकेषु पादेषु प्रतिपाद्या अर्थाः संगृहीताः। ननु यथोक्तेभ्यः पादार्थेभ्योऽन्येऽप्यर्था बहवस्तत्तत्पादेषु विचार्यन्ते तेषां कथं तत्तत्पादान्तर्भाव इत्याशङ्क्याह" । "उपोद्घातापवादाभ्यां प्रसङ्गानुप्रसङ्गतः। तत्तत्पादगतत्वेन विचारान्तरसङ्गयेत्" "यथोक्तपादप्रतिपाद्यादन्येष्वर्थेषु यथोचितं कश्चिदुपोद्घातः कश्चिदपवादः कश्चित् प्रसङ्गपतितः कश्चिदनुप्रसङ्गपतित इत्येवं पादान्तर्भाव उन्नेयः"। जैमिनिश्च भारतान्तरं चकार तस्य जैमिनिभारतेति संज्ञा तन्नामस्मरणे च वज्रपातभयवारणं यथा "जैमिनिश्च सुमन्तुश्च वैशम्पायन एव च। पुलस्त्यः पुलहश्चैव पञ्चैते वज्रवारकाः" शब्दकल्पद्रुमधृतपुराणवाक्यात् "मुनेः कल्याणमित्रस्य जैमिनेश्चापि कीर्त्तनात्। विद्युदग्निभयं नास्ति पठिते च गृहोदरे" इत्युक्तेरपि तत्कीर्त्तनस्य विद्युदग्निभयनिवारकता। तत इदमर्थे छ। जैमिनीय जैमिनिप्रणीतशास्त्रादौ। "जैमिनीये च वैयासे विरुद्धांशो न कश्चन" सांख्यप्रवचनभाष्यधृतपराशरोपपु०। "जैमिनीयन्यायमाला श्लोकैः संगृह्यते स्फुटम्" माधवः।

**जैव** त्रि० जीवस्येदम् अण्। १आत्मसम्बन्धिनि २वृहस्पतिसम्बन्धिनि ३तत्क्षेत्रे धनूराशौ मीनराशौ तदधिदेवताके ४पुष्यनक्षत्रे। ५तदीये याते च "क्रमाद्रिचन्द्राः जैवस्य त्रिखाङ्काश्च भगोत्तमा" सू० सि०।

**जैवन्तायन** पुंस्त्री जीवन्तस्य गोत्रापत्यं वा फञ्। जीवन्तर्षेः गोत्रापत्ये। स च यजुर्वेदप्रचारकवंशान्तर्गतः। यथाह "जैवन्तायनाच्च रैभ्याच्च रैभ्यः" शत० ब्रा० १४।७।३।२६ पक्षे इञ्। जैवन्ति तत्रार्थे स्त्रियां ङीप्।

**जैवन्तायनि** त्रि० जीवन्तास्यादूरदेशादि कर्णा० चतुरर्थ्यां फिञ्। जीवन्तस्यादूरदेशादौ।

**जैवलि** पु० जीवलस्य राज्ञोऽपत्यम् इञ्। जीवलन्तृपापत्ये प्रवाहणे "तं ह प्रवाहणो जैवलिरुवाचान्वहि किल ते शालावत्य! साम" छा० उ०।

**जैवातृक** पु० जीवयत्यनेन लोकं जीवति वा आतृ—कन् वृद्धिश्च। १चन्द्रे २कर्पूरे अमरः। ३पुत्रे संक्षिप्तसा०। ४औषधे हेम० ५दीर्घायुष्के त्रि० मेदि०। "जैवातृक! ननु श्रूयते पतिरस्याः मिथिलायां प्रकाशवर्णासीत्" दशकु०। [जीवस्यादूरदेशादौ।

**जैवि** त्रि० जीवस्यादूरदेशादि सुतङ्गमा० चतुरर्थ्यां इञ्।

**जैवेय** पुंस्त्री जीवस्य गुरोरपत्यं शुभ्रा० ढक्। जीवस्यापत्ये कचनामके मुनौ। जीवाया मौर्व्या इदम् स्त्रीत्वात् ढक्। २ज्यासम्बन्धिनि त्रि०।

**जैह्माशिनेय** पु० जिह्माशिनोऽपत्यं शुभ्रा० ढक् दाण्डिना० नि० टिलोपः। जिह्माशिनोऽपत्ये।

**जैह्म्य** न० जिह्मस्य भावः ष्यञ्। कौटिल्ये। "जैह्म्यञ्च मैथुनं पुंसि जातिभ्रंशकरं स्मृतम्" मनुः। "निषिद्धभक्षणं जैह्म्यमुत्कर्षश्च वचोऽन्ततम्। रजस्वलामुखास्वादः सुरापानसमानि तु" याज्ञ०।

**जोङ्ग** न० जुङ्ग्यते वर्ज्यते जुगि—वर्जने कर्मणि अच् पृषो०। कालीयके गन्धद्रव्यभेदे हारा०।

**जोङ्गक** न० जुगि—ण्वुल् पृषो०। अगुरुचन्दने अमरः।

**जोङ्गट** पु० जुगि—अटन् पृषो०। गर्भिण्या अभिलाषे दोहदे (साद) हारा०।

**जोटिङ्ग** पु० जट—इन् जोटिं गच्छति बा० ड खिच्च। १महादेवे २महाव्रतिनि च त्रिका०। [त्रि० कौ०।

**जोड** पु० जुड—बन्धने घञ्। बन्धने। जड्डिजोड्म्

**जोन्ताला** स्त्री जु—विच् तस्यान्तमालाति आ+ला—क। देवधान्ये हेमच०।

**जोष** पु० जुष—भावे घञ्। १प्रीतौ २सेवने च "को वां जोष उभयोः" ऋ० १।१२०।१। ३सुखे न० शब्दर०।

**जोषण** न० जुषी—प्रीतिसेवनयोः भावे ल्युट्। १प्रीतौ २सेवने च। स्वार्थे णिच्—भावे युच्। तत्रार्थे स्त्री "उत्तरे निगमाः यथेष्टं जोषणा स्मृतेः" कात्या०श्रौ०५।१२।१६।

**जोषम्** अव्य० जुष—बा० अम्। १तूष्णीमित्यर्थे "इति जोषमवस्थितं द्विषः" माघः। २सुखे च अमरः।

**जोषा** स्त्री जोषयति जुष—णिच्—अच्। १योषिति शब्दर० "चन्द्रेण जुषधातोः समव्ययान्तयाऽयं व्युत्पादितः" उज्ज्वलदत्तः। [२योषिति च।

**जोषिका** स्त्री जु—स संज्ञायां कन्। १जालिकायां शब्दर०।

**जोषित्** स्त्री जुष "हृसृरुहियुषि(षि)भ्यः" उणा० इति। स्त्रीमात्रे शब्दर०। हलन्तत्वात् वा टाप्। जोषिताऽपि तत्रार्थे शब्दर०।

**जोष्टृ** त्रि० जुष—तृच् बेदे बा० इड्भावः। सेवके। "उपेनमस्य जोष्टारः" ऋ०४।४१।६। "जोष्टारः सेवकाः" भा०। लोके तु जोषितृ इत्येव।

**जौमर** न० जुमरेण निर्वृत्तः अण्। १जुमरनन्दिकृते संक्षिप्तसाराख्ये व्याकरणे २तदध्येतरि त्रि०।